3.1.5

**संस्थायाम् अधोलिखितांशाः सन्ति–**

1. अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना

2. शोधप्रबन्ध/लघुशोधप्रबन्ध/परियोजनाप्रतिवेदनेषु अनिवार्यमाध्यमत्वेन संस्कृतम् 3. औपचारिक-अनुसन्धान-उपाध्यङ्गतया संस्कृतग्रन्थानां शास्त्रीयग्रन्थानां वाऽनुवादाय प्रोत्साहनम् 4. औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीका/व्याख्यालेखनार्थं प्रोत्साहनम् 5. संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणाय योजना

## Answer

**विश्वविद्यालये अधोलिखिताः अंशाः सन्ति।**

1. अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना - एकं विषयविशेषमधिकृत्य विस्तरेण क्रियमाणम् अध्ययनम् ; विशेषतः नूतनतथ्यानां नूतनपदार्थानां च क्रमबद्धरूपेण अन्वेषणम् एव अनुसन्धानम् इति उच्यते। तत्रापि अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनादीनां कार्याणां सम्पादनेन अप्रकाशितग्रन्थानां ग्रन्थकाराणां वैशिष्ट्यानि बहिरायान्ति। अज्ञातकर्तृकग्रन्थाः इति अपवादोऽपि दूरीभवति अप्राकाशितानां व्यवस्थितरूपेण प्रकाशनेन। अतः सम्पूर्णानंद संस्कृतविश्वविद्यालयस्य सरस्वतीभवने परिसरेषु अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनादीनि कार्याणि शोधच्छात्रैः क्रियन्ते। लक्षाधिक सङ्ख्याकाः पाण्डुलिपयः अत्र सन्ति। सर्वाधिकाः पाण्डुलिपयः अद्यावधि प्रकाशिताः सन्ति। अत्र सरस्वतीभवने संस्कृतवाङ्मयस्य सर्वासाम् शाखानां पाण्डुलिपयः सङ्गृ हीताः सन्ति। विविध-प्रान्तीय-लिपिषु निबद्धानाम् पाण्डुलिपीनाम् संख्या षड्पञ्चाशत् सहस्त्रं वर्तते। अत्रत्यानाम् शोधच्छात्राणां, रुच्यनुरुपं शोधकार्यहेतवे हस्तलेखानाम् आवण्टनं क्रियते। तद्नु मार्गदर्शकस्य निर्देशात् शोधच्छात्राः पाण्डुलिपीनाम् सम्पादनम्, अनुशीलनं, तुलनात्मकम् समीक्षणम् शोधोपाधिहेतवे कुर्वन्ति। अत्र नियुक्ताः आचार्याः , सहाचार्याः , सहायकाचार्याः अपि पाण्डुलिपीनाम् सम्पादनं कुर्वन्ति। राष्ट्रिय-अन्ताराष्ट्रिय-स्तरेऽपि शोधसम्पादन-हेतवे शोधार्थिभ्यः पाण्डुलिपयः प्रदीयन्ते। आयुर्वेदस्य ज्यौतिषस्य वेदान्तादीनां शास्त्राणां पाण्डुलिपयः सम्पादिताः अपि सन्ति। विश्वविद्यालयस्य वृंते राज्यसर्वकार द्वारा त्रिशंतलक्षात्मक आर्थिकम् अनुदानम् अपि दीयते । सम्पूर्णानंद संस्कृतविश्वविद्यालयस्य शोधनीतौ अपि

मातृकासम्पादनस्य ग्रन्थसम्पादनयोजनायाश्च प्रारुपं कथं भवेत् इत्यत्र मार्गदर्शनसूत्राणि उल्लिखितानि सन्ति।

2. शोधप्रबन्धादिषु अनिवार्यमाध्यमत्वेन संस्कृतम् - विश्वविद्यालयस्य सर्वेऽपि शोधप्रबन्धाः लघुशोधप्रबन्धाः संस्कृतपरियोजनाश्च संस्कृतमाध्यमेन एव विरच्यन्ते। विगतेषु पञ्चसु वर्षेषु 150 संङ्ख्याकाः शोधप्रबन्धाः संस्कृतभाषामाध्यमेन एव लिखिताः सन्ति। विश्वविद्यालयस्य शोधनियमावल्याम् अपि सुस्पष्टं लिखितं वर्तते यत् संस्कृतमाध्यमेन एव शोधप्रबन्धाः लघुशोधप्रबन्धाः शोधपत्राणि च लेखनीयानि इति। एवम् आधुनिके शिक्षाशास्त्रे विद्यमानान् अत्याधुनिकविषयान् अवलम्ब्य अपि संस्कृतमाध्यमेन एव विश्वविद्यालयस्य छात्राः शोधकार्यं सम्पादयन्ति।

3. अनुसन्धानोपाधिलाभाय संस्कृतशास्त्रग्रन्थानां अनुवादावसरः - विश्वविद्यालये अनुसन्धानकार्यत्वेन संस्कृतशास्त्रग्रन्थानां अनुवादार्थमपि अवसरः कल्प्यते। ये ग्रन्थाः प्रौढशैल्या लिखिताः सन्ति ते दुर्बोधाः भवेयुः इति मत्वा बालानां सुखबोधाय सरलभाषया तत्तादृशानां ग्रन्थानाम् अनुवादकार्यमपि सरलव्याख्यामुखेन सम्पादयन्ति। ब्राह्मी , शारदा इत्याद्यासु लिपिषु निबद्धानां ताडग्रन्थानां देवनागर्याम् अनूद्य लिखन्ति शोधच्छात्राः । प्रादेशिकभाषासु निबद्धानां संस्कृतग्रन्थानां मूलप्रतयः लभ्यन्ते चेत्तर्हि तासाम् अपि अनुवादकार्यं सम्पादयन्ति शोधच्छात्राः । अनेन तेषां कृते विद्यावारिधिः इति उपाधिः दीयते। मातृकासम्पादनावसरे न्यूनातिन्यूनं तिस्रः मातृकाः अपेक्ष्यन्ते। तासाम् अध्ययनम् अनिवार्यं भवति शोधोपाधिग्रहणाय । मातृकाः प्रादेशिकभाषास्वपि प्रचुरमात्रेण लिपिबद्धाः भवन्ति। सर्वकारद्वारा विविधसंस्कृतसाहित्यानाम् अनुवादाय आर्थिकम् अनुदानम् अपि दीयते, यस्य लाभम् अस्माकं परिसरीयाः अध्यापकाः असकृत् कुर्वन्ति।

4.औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीकाव्याख्यालेखार्थं प्रोत्साहनम् - सूत्रभाष्यवार्तिकानि टीकोपटीकाः व्याख्याश्च संस्कृतवाङ्मयस्य जीवातुभूतानि तत्त्वानि सन्ति। टीकालेखनाय व्याख्यालेखनाय च प्रतिपदं मार्गदर्शनं कुर्वन्ति शिक्षकाः । स्वयमपि शास्त्रज्ञैः शिक्षकैः शास्त्रीयाः टीकाग्रन्थाः विरचिताः विद्यावारिधिरित्युपाधिलाभाय। विश्वविद्यालयस्य प्रकाशनेन अपि एतादृशाः विद्वत्पूर्णाः टीकाग्रन्थाः प्रकाशिताः सन्ति। विश्वविद्यालयस्य शोधच्छात्राः अपि अप्रकाशितानां टीकाग्रन्थानां सम्पादनं कृत्वा प्राचीनान् टीकाकारान् पुनरुज्जीवयन्तः सन्ति। टीकां सम्पाद्य व्याख्यालेखनेन शताधिकाः शोधच्छात्राः विद्यावारिधिः इति उपाधिं प्राप्नुवन्ति।

5. संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणयोजना - विश्वविद्यालये संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणयोजनाः बहवः सन्ति। विश्वविद्यालयस्य योजनाविभागेन अपि एतदर्थं

बहुविधाः योजनाः विनिर्मिताः सन्ति। एतानि अध्ययनाध्यापनसामग्रीरूपेण बहुत्र उपयुज्यन्ते। विश्वविद्यालयस्य प्रकाशनविभागः सक्रियः वर्तते यस्मात् बहूनि शास्त्रीयपुस्तकानि प्रकाश्यन्ते। अत्र संस्कृतेन पाठ्यपुस्तकानां विविधसाधनानां प्रकाशनाय धनसहयोगः दीयते। अत्रत्यौ शिक्षकैः अपि बहवः अध्ययनाध्यापनसामर्ग्यः निर्मीयन्ते। अतः छात्राः विना क्लेशं संस्कृतमाध्यमेन एव संस्कृतशिक्षाम् अवाप्तुं प्रभवन्ति।

शास्त्रानां अध्ययनाय देशस्य सीमानतभागतः वैदेशिका अपि छात्राः अत्र पठितुं समायान्ति। संस्कृत भाषया सह पालि प्राकृत भाषायामपि श्रवण विद्या संकाये पठमानाः छात्राः सन्ति। इतः शिक्षां प्राप्तं देशसय कोणे-कोणे विद्यमानेषु संस्कृत विश्वविद्यालये प्रतिष्ठिताः सन्ति।